## रम्यसंस्कृतम्। किं कुर्यात्? किं भवेत्?



जनाः आर्द्रं शुष्कं च
अवकरं पृथक् क्षिपेयुः।



त्वं भ्रमणध्वनिना
अधिकसमयं न क्रीडेः।




अद्य आरभ्य वयम्
आदिनं पठेम।



श्वः अहं पुस्तकम् आनयेयम्।



एतं तालं युवां पुनःपुनः वादयेतम्।



आवां फलके सुभाषितं लिखेव।

**पञ्चदशवाक्यानि पठत।**

| | | |
|---|---|---|
| १. सः/भवान् पठेत्/रमेत। | २. तौ/भवन्तौ पठेताम्/रमेयाताम्। | ३. ते/भवन्तः पठेयुः/रमेरन्। |
| ४. सा/भवती पठेत्/रमेत। | ५. ते/भवत्यौ पठेताम्/रमेयाताम्। | ६. ताः/भवत्यः पठेयुः/रमेरन्। |
| ७. तत् पठेत्/रमेत। | ८. ते पठेताम्/रमेयाताम्। | ९. तानि पठेयुः/रमेरन्। |
| १०. त्वं पठेः/रमेथाः। | ११. युवां पठेतम्/रमेयाथाम्। | १२. यूयं पठेत/रमेध्वम्। |
| १३. अहं पठेयम्/रमेय। | १४. आवां पठेव/रमेवहि। | १५. वयं पठेम/रमेमहि। |

**पुनःस्मारणम्। उपपदविभक्तयः (अव्ययानि)।**

कानिचन अव्ययानि विशिष्ट-विभक्तिरूपम् अपेक्षन्ते । तानि अधः निर्दिष्टानि ।

१. अभितः = (द्वितीया) **भानुम्** अभितः ग्रहाः भ्रमन्ति ।
२. परितः = (द्वितीया) **मातरं** परितः गणेशः प्रदक्षिणां करोति ।
३. उभयतः = (द्वितीया) **नदीम्** उभयतः क्षेत्राणि विद्यन्ते ।
४. प्रति = (द्वितीया) सायङ्काले वत्सः **धेनुं** प्रति वेगेन गच्छति ।
५. विना = (द्वितीया/तृतीया/पञ्चमी) **चन्द्रमसम्/चन्द्रमसा/चन्द्रमसः** विना निशा न शोभते ।
६. सह = (तृतीया) **पित्रा** सह अनिकेतः आपणं गच्छति ।
७. अलम् = (तृतीया) अलं **निद्रया** । अलं **भीत्या** । अलं **वार्तालापेन** ।
८. नमः = (चतुर्थी) **गणपतये** नमः । **गुरवे** नमः । **मरुते** नमः। **महालक्ष्म्यै** नमः ।
९. बहिः = (पञ्चमी) **गृहात्** बहिः माता आगता ।
१०. कृते = (षष्ठी) **स्वसुः** कृते बन्धुः उपहारम् आनयति ।
११. समीपे = (षष्ठी) **नगरस्य** समीपे उद्यानं वर्तते।